# Ishvarapratipattiprakasha

# ઈશ્વરપ્રતિપત્તિપ્રકાશઃ

## Document Information

Text title : IshvarapratipattiprakAsha

File name : IshvarapratipattiprakAsha.itx

Category : vedanta, major_works, madhusUdanasarasvatI

Location : doc_z_misc_major_works

Author : Madhusudana Sarasvati

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : A devotional poem by an advaita philosopher

Latest update : Mar. 10, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# ઈશ્વરપ્રતિપત્તિપ્રકાશઃ

ઈશ્વરપ્રતિપત્તિપ્રકાશઃ શ્રીમધુસૂદનસરસ્વતીપ્રણીતઃ
સંસ્કૃતગ્રન્થપ્રકાશનકાર્યાધ્યક્ષેણ મહામહોપાધ્યાયેન
ત. ગણપતિશાસ્ત્રિણા સંશોધિતઃ ।

અન્તર્યામી સમસ્તેશો વાદિવિપ્રતિપત્તિભિઃ ।
યઃ ક્રીડતિ પરાનન્દસ્તં વન્દે નન્દનન્દનમ્ ॥

અથ કીદૃશસ્તા વાદિવિપ્રતિપત્તયઃ ? ઉચ્યન્તે —

બાર્હસ્પત્યાસ્તાવદ્ દેહમાત્રાત્મવાદિનઃ પારલૌકિકકર્મતત્ફલવિમુખાઃ સુખાય તાદાત્વિકાય ભોજનાચ્છાદનાદિભિર્દૃષ્ટૈરેવોપાયૈઃ પ્રયતમાના નાનાવિધશ્રુતિસ્મૃતિપુરાણાનુમાનાદિપ્રમાણપ્રતિપાદિતમપિ પરમેશ્વરં પ્રત્યક્ષાતિરિક્તપ્રમાણાનભ્યુપગમેન જડીકૃતાન્તઃકરણા મરણાન્તમેવ મોક્ષં મન્યમાના દુર્દૈવવૈભવેનૈવ દુર્વિનીતા નોરરીકુર્વતે ।

બુદ્ધમતાનુસારિણસ્તુ બુદ્ધદેવપ્રામાણ્યા અપિ ન દેહમાત્રમ્ આત્માનમ્ ઉપયન્તિ, કિન્તુ પ્રત્યક્ષાતિરિક્તમ્ અનુમાનમ્ અભ્યુપગચ્છન્તઃ પ્રતિક્ષણવિનાશિનં દેહાદિવ્યતિરિક્તં વિજ્ઞાનસ્કન્ધમ્ આત્માનમ્ અભ્યુપેત્ય બન્ધમોક્ષાદિવ્યવસ્થામ્ આસ્થાય પારલૌકિકમપિ કિઞ્ચિત્ ક્રિયાકલાપમ્ અવૈદિકમેવ સેવમાનાઃ સર્વજ્ઞવિજ્ઞાનસન્તાનરૂપમ્ ઈશ્વરમ્ અખિલસ્ય ભૌતિકસ્યાભ્યુપગચ્છન્તિ । દિગમ્બરાસ્તુ દેહાદિવ્યતિરિક્તં દેહમાત્રપરિમાણમ્ નિયતાવયવમ્ અવિનાશિનમ્ આત્માનમ્ અભ્યુપગચ્છન્તઃ સપ્તભઙ્ગીનયં નામ ન્યાયમ્ અવતારયન્તઃ ક્ષણભઙ્ગવાદમ્ અનઙ્ગીકૃત્ય સ્થિરમ્ અર્હન્તમ્ ઈશ્વરમ્ ઉપયન્તિ—સ્યાદસ્તિ, સ્યાન્નાસ્તિ, સ્યાદસ્તિ ચ નાસ્તિ ચ, સ્યાદવક્તવ્યઃ, સ્યાદસ્તિ ચાવ્યક્તવ્યશ્ચ, સ્યાન્નાસ્તિ ચાવ્યક્તવ્યશ્ચ, સ્યાદસ્તિ ચ નાસ્તિ ચાવક્તવ્યશ્ચેતિ ।

સ્યાચ્છબ્દોઽયમ્ અપ્યર્થે નિપાતઃ । તેન ચ સર્વેષામ્ અનૈકાન્તિકત્વમ્ આદર્શિતમ્ । તથા ચાયમર્થઃ । સદેવ સર્વમિતિ સાઙ્ખ્યાઃ, અસદેવ્

સર્વમિતિ માધ્યમિકાઃ, સદસદેવ સર્વમિતિ તાર્કિકાઃ, અનિર્વચનીયમેવ સર્વમ્ ઇત્યૌપનિષદાઃ । અનિર્વચનીયત્વં ચ સદ્વિલક્ષણત્વે સતિ અસદ્વિલક્ષણત્વે સતિ સદસદ્વિલક્ષણત્વમ્ । તેન સદપિ, અસદપિ, સદસદપિ, અનિર્વચનીયમપીતિ પ્રત્યેકં ચત્વારો ભઙ્ગાઃ, સદપિ સદ્વિલક્ષણમપિ, અસદપિ અસદ્વિલક્ષણપિ, સદસદપિ સદસદ્વિલક્ષણમપીત્યનિર્વચનીયતાસમુચ્ચયેન ત્રયો ભઙ્ગા ઇતિ મિલિત્વા સપ્તભઙ્ગીનય એવં ધર્માન્તરેઽપિ યોજ્યઃ । તથાચ ન ક્ષણિકત્વસિદ્ધિઃ સર્વેષાં પદાર્થાનાં સપ્તરૂપતયા અનુભવાદિત્યભિપ્રાયઃ ।

માધ્યમિકાસ્તુ સપ્તભઙ્ગીનયન્યાયસ્ય શૂન્યતાપર્યવસાયિત્વાત્ સર્વાનિર્વચનીયત્વેન શૂન્યમેવેશ્વર ઇતિ સર્વપ્રમાણાપલાપેનૈવ પ્રગલ્ભમાનાઃ પરિકલ્પયન્તિ ।

એવં સર્વેઽપિ નાસ્તિકા વેદપ્રમાણશૂન્યતયા યત્કિઞ્ચિજ્જલ્પન્તિ ।

આસ્તિકાસ્તુ સર્વેઽપિ વેદપ્રામાણ્યમ્ અવ્યાહતં મન્યમાના દેહાદિવ્યતિરિક્તમ્ આત્માનં નિત્યં વિભુમ્ ઉપગચ્છન્તિ । પરન્તુ પરમેશ્વરે કેચન વિપ્રતિપદ્યન્તે । તથાહિ —–

પાતઞ્જલા મન્યન્તે “ક્લેશકર્મવિપાકાશયૈરપરામૃષ્ટઃ પુરુષવિશેષ ઈશ્વરઃ” (પાત।૧।૨૪) ઇતિ । અવિદ્યાસ્મિતારાગદ્વેષાભિનિવેશાઃ પઞ્ચ ક્લેશાઃ । ક્લેશમૂલઃ કર્માશયો દૃષ્ટાદૃષ્ટવેદનીયઃ । વિપાકો જાત્યાયુર્ભોગાઃ । આશયો વાસના । એતૈઃ સંસારી પુરુષો વિવેકાભાવેન પરામૃશ્યત ઇવ જલપ્રતિબિમ્બિતચન્દ્ર ઇવ જલકમ્પાદિભિઃ । યસ્તુ સર્વજ્ઞત્વાત્ તૈર્ન પરામૃશ્યતે, સ પુરુષવિશેષઃ શુદ્ધજ્ઞાનસ્વરૂપઃ સર્વવ્યાપકો નિત્યશ્ચ પરમેશ્વર ઇતિ । પ્રમાણં ચાનુમાનમ્ આહુઃ —- ”તત્ર નિરતિશયં સર્વજ્ઞબીજમ્“ (પાત। ૧।૨૫) ઇતિ । સર્વજ્ઞશબ્દો ભાવપ્રધાનઃ ”દ્વ્યેકયોરિ”તિવત્ । તથા ચ વિજ્ઞાનૈશ્વર્યતારતમ્યં ક્વચિદ્ વિશ્રાન્તમ્ અણુત્વમહદ્ભાવેનોત્કૃષ્યમાણત્વાત્ પરિમાણતારતમ્યવદ્ ઇત્યનુમાનં સૂચિતમ્ । તથા ચ એકવિષયવદ્ દ્વિવિષયત્રિવિષયત્વાદિનોત્કૃષ્યમાણં જ્ઞાનં યત્ર સર્વવિષયત્વેનોત્કૃષ્યતે સ સર્વજ્ઞઃ, સર્વવિષયૈશ્વર્યયોગાચ્ચ સર્વેશ્વરઃ સિદ્ધ ઇતિ ।

વૈશેષિકાસ્તુ જન્યમાત્રકર્તૃત્વેન પરમેશ્વરમ્ અનુમિમતે । તથા હિ—-ઘટાદીનાં જન્યાનાં કુલાલાદયઃ કર્તારો જનકા દૃષ્ટા ઇતિ ક્ષિત્યાદેરપિ સાવયવસ્ય જન્યસ્ય કેનચિત્ કર્ત્રા ભવિતવ્યમ્ । કર્તા ચોપાદાનગોચરાપરોક્ષજ્ઞાનચિકીર્ષાકૃતિમાન્ । ન ચ ક્ષિત્યાદ્યુપદાનપરમાણ્વાદિગોચરાપરોક્ષજ્ઞાનવાન્ સંસારી ભવતિ । તસ્માદ્ નિત્યજ્ઞાનચિકીર્ષાકૃતિમાન્ સર્વજ્ઞઃ પરમેશ્વરઃ સિદ્ધ ઇતિ । તથા ચ ક્ષિતિઃ સકર્તૃકા કાર્યત્વાદ્ ઘટવદ્ ઇત્યનુમાનં સૂચિતમ્ ।

નૈયાયિકાસ્તુ સર્વકર્મફલદાયિત્વેનેશ્વરમ્ અનુમિમતે । તથા ચાહુઃ—-"ઈશ્વરઃ કારણં પુરુષકર્માફલ્યદર્શનાત્" (ન્યાય। ૪।૩।૧૯) ઇતિ । સર્વમચેતનં ચેતનાધિષ્ઠિતં સત્ પ્રવર્તતે । ધર્માધર્માખ્યં કર્માચેતનં યેન ચૈતન્યેનાધિષ્ઠિતં સત્ સ્વફલદાનાય પ્રવર્તતે, સ સર્વજ્ઞઃ પરમેશ્વર ઇતિ । ઇદં ચ સૂત્રમ્ ઈશ્વરોપાદાનત્વે પૂર્વપક્ષભૂતમપિ તન્નિમિત્તત્વે સિદ્ધાન્ત એવેતિ દ્યોતકભૂતયઃ ।

એવં પશુપતિરેવ પાશુપતાગમસિદ્ધઃ પરમેશ્વર ઇતિ પાશુપતાઃ ।

ચતુર્વ્યૂહાત્મકો વિષ્ણુરેવેતિ પાઞ્ચરાત્રિકાઃ ।

હિરણ્યગર્ભ એવ પરમેશ્વરઃ, સ એવ વિષ્ણશિવાદિરૂપતામપિ ગૃહ્ણાતીતિ હૈરણ્યગર્ભાઃ ।

વેદાન્તવેદ્યઃ સચ્ચિદાનન્દરૂપઃ સર્વજ્ઞઃ સર્વશક્તઃ સર્વજગદુપાદાનં નિમિત્તં ચ પરમાત્મૈવ પરમેશ્વર ઇતિ બ્રહ્મવાદિનઃ ।

અત્રાહુઃ સાઙ્ખ્યાઃ—–સંસારિપુરુષવિલક્ષણે પરમેશ્વરે કિં પ્રમાણં? ન તાવત્ પાતઞ્જલોક્તમ્ અનુમાનમ્, અપ્રયોજકત્વાત્ । યથા હિ પરિમાણતારતમ્યં નૈકત્રૈવ વિશ્રાન્તં, કિન્ત્વણુત્વં પરમાણુષુ મહત્ત્વં ચ પરમમહત્સુ કાલાકાશાદિષ્વિતિ તાર્કિકમતં દૃષ્ટાન્તીકૃતં, તથા ચ દાર્ષ્ટાન્તિકેઽપિ અલ્પવિષયત્વવિશ્રાન્તિર્વક્તવ્યા । તદનભ્યુપગમે ચ પરિમાણતારતમ્યં કથં દૃષ્ટાન્તઃ । એવઞ્ચાલ્પત્વવિશ્રાન્તિ રેકવિષયત્વેન બહુત્વવિશ્રાન્તિશ્ચ પરાર્ધવિષયત્વેનેતિ ન સર્વજ્ઞસિદ્ધિઃ । સઙ્ખ્યાતારતમ્યે વ્યભિચારાચ્ચ ।

નાપિ વૈશેષિકોક્તં જગત્કર્તૃત્વાનુમાનં, વ્યાપ્યત્વાસિદ્ધેઃ । ન હિ જન્યત્વેન જન્યત્વં કર્તૃત્વેન કર્તૃત્વમિતિ વ્યાપ્તિરસ્તિ,

જન્યત્વેન જન્યત્વે જનકત્વેન જનકત્વાદ્ અવિશેષાદ્ । અન્યથા (ન ?) જન્યમાત્રે સમ્પ્રદાનાદેરપ્યનુમાનં સ્યાત્ ક્વચિત્ દર્શનાત્ । ન ચૈકસ્ય કર્તૃત્વં સિધ્યતિ વિચિત્રપ્રાસાદાદૌ બહુકર્તૃત્વદર્શનાત્, ચતુર્દશભુવનરચનાયા અપ્યતિવિચિત્રત્વાત્ । અકારણપારિમાણ્ડલ્યાદિજ્ઞાને ચ માનાભાવાદ્ ન જ્ઞાનસ્ય સર્વવિષયત્વસિદ્ધિઃ । નિત્યત્વેન સર્વવિષયત્વં વિષયતયા સઙ્કોચકાભાવાત્; જન્યં હિ કારણવિશેષવશાત્ સઙ્કુચિતવિષયં ભવતીતિ ચેન્ન, અનિત્યત્વેન ક્વાપિ સર્વવિષયત્વદર્શનાદ્ અનિત્યસ્યાપિ યોગિજ્ઞાનસ્ય (પ્રયોમિ ?)તિ જ્ઞાનસ્ય ચ સર્વવિષયત્વાચ્ચ । નિત્યત્વે કિં માનં ? શરીરેણાનવચ્છેદાત્, શરીરાવચ્છેદેન હિ જ્ઞાનમ્ ઉત્પદ્યતે, પરમેશ્વરસ્ય ચ નાસ્તિ શરીરં ધર્માધર્મશૂન્યત્વાદિતિ ચેદ્, ન તાવદ્ અસિદ્ધં, સાક્ષાત્ પ્રયત્નાધિષ્ઠેયં હિ શરીરમ્ ઉચ્યતે, પરમેશ્વરસ્ય ચ સાક્ષાત્ પ્રયત્નાધિષ્ઠેયાઃ પરમાણવઃ । અતઃ પરમાણુશરીરત્વમ્ ઈશ્વરસ્ય યુક્તમ્ । ઇદમેવાઙ્ગીકૃતમ્ ઉદયનાચાર્યૈઃ ટીકાપ્રથમશ્લોકવ્યાખ્યાને । આકાશો વા તસ્ય શરીરમ્ "આકાશશરીરં બ્રહ્મે"તિ શ્રુતેઃ । તથા ચ તસ્યાપિ શરી(ર?રિ)ત્વસમ્ભવાદ્ જ્ઞાનત્વેન જન્યત્વમિતિ વ્યાપ્તિર્ન ભઞ્જનીયા । એતેન શરીરાજન્યત્વેન ક્ષિત્યાદેઃ કર્ત્રજન્યત્વમિતિ મીમાંસકમતમપિ પ્રત્યાખ્યાતં, ક્ષિત્યાદેઃ તચ્છરીરપરમાણુજન્યત્વાત્ । તથા ચ અનિત્યજ્ઞાનવાન્ સર્વજ્ઞકલ્પઃ સિદ્ધઃ, ક(શ્ચિ)દેવ પરમેશ્વરત્વેન વ્યવહ્રિયતે, સ ચ પ્રતિકલ્પં ભિદ્યતે, તત્પરતયૈવ સર્વે શ્રુતિસ્મૃતિવાદા યોજયિતવ્યા ઇતિ નિર્વિવેકતયા સાઙ્ખ્યૈરુક્તમ્ ।

અત્રોચ્યતે બ્રહ્મવાદિભિઃ——અનુમાનાદીશ્વરસિદ્ધિર્નાસ્તીતિ યદુક્તં, તત્ તથૈવ તસ્ય સ્વાતન્ત્ર્યેણાતીન્દ્રિયાર્થાસાધકત્વાત્ । પરન્તુ વેદાન્તાત્ સિદ્ધિઃ । "યો બ્રહ્માણં વિદધાતિ પૂર્વં યો વૈ વેદાંશ્ચ પ્રહિણોતિ તસ્મૈ ।" "તં હ દેવમાત્મબુદ્ધિપ્રકાશં મુમુક્ષુર્વૈ શરણમહં પ્રપદ્યે ॥"

"યઃ સર્વજ્ઞઃ સર્વવિદ્ યસ્ય જ્ઞાનમયં તપઃ ।

તસ્માદેતદ્ બ્રહ્મ નામ રૂપમન્નં ચ જાયતે ॥"

"ન તસ્ય કર્તા કરણં ચ વિદ્યતે

ન તત્સમશ્ચાભ્યધિકશ્ચ દૃશ્યતે ।

પરાસ્ય શક્તિર્વિવિધૈવ શ્રૂયતે

સ્વાભાવિકી જ્ઞાનબલક્રિયા ચ ॥"

"વિજ્ઞાનમાનન્દં બ્રહ્મ ।"
ઇત્યાદ્યાઃ શ્રુતયઃ સર્વજ્ઞસર્વશક્તિપ્રમાનન્દરૂપં હિરણ્યગર્ભાદિસકલસિદ્ધિકારણં પરમેશ્વરં પ્રતિપાદયન્તિ સહસ્રશઃ । ન ચૈતાસામ્ અન્યપરત્વં સમ્ભવતિ, ઉપક્રમાદિષડ્વિધલિઙ્ગાનાં પરમેશ્વર એવોપલમ્ભાત્ । ન ચ કાર્ય એવાર્થે વેદસ્ય પ્રામાણ્યં સિદ્ધમિતિ વાચ્યમ્ । કાર્યપરત્વસ્ય પ્રામાણ્યાપ્રયોકત્વાત્, "ચૈત્યં વન્દેત સ્વર્ગકામ" ઇત્યાદિનાસ્તિકવાક્યસ્યાપિ પ્રામાણ્યપ્રસઙ્ગાત્ । તત્ર ચ દુષ્ટકરણત્વેનૈવાપ્રામાણ્યે પ્રામાણ્યમ્ અદુષ્ટકરણત્વેનૈવેતિ કાર્યપરત્વમ્ અપ્રયોજકમ્ । તસ્માત્ પ્રયોજનવદબાધિતાજ્ઞાતજ્ઞાપકત્વમેવ પ્રામાણ્યં ન કાર્યપરત્વં ચેતિ વિસ્તૃતમન્યત્ર ।

એવં સિદ્ધે પરમેશ્વરે તદ્વિશેષનિરૂપણં ક્રિયતે । તત્ર પઞ્ચધા વિષ્ણુરિતિ મુક્તાફલકારાઃ । તથાહિ—–સાકારનિરાકારભેદેન પ્રથમં દ્વિધા । તત્ર નિરાકાર એકરૂપ એવ । સાકારશ્ચતુર્ધા—– પુરુષો બ્રહ્મા વિષ્ણુર્મહેશ્વરશ્ચેતિ । એવમેવ શિવતન્ત્રે વ્યક્તમ્ —–

"બ્રહ્મા વિષ્ણુર્મહાદેવ ઈશ્વરશ્ચ સદાશિવઃ ।" ઇતિ ।
તત્ર સદાશિવો નિરાકારશ્ચેતિ નિરુપાધિચૈતન્યસ્વરૂપઃ સિદ્ધ એકઃ પુરુષઃ । ઈશ્વરશ્ચેતિ ગુણત્રયાવચ્છિન્નમાયોપાધિરેકઃ, રજોગુણાવચ્છિન્નો બ્રહ્મા, સત્ત્વગુણાવચ્છિન્નો વિષ્ણુઃ, તમોગુણાવછિન્નો રુદ્ર ઇતિ ।

નૃસિંહતાપનીયે તુ ચતુર્ધા વિભાગ ઉક્તઃ——"ઓતોઽનુજ્ઞાતા અનુજ્ઞાવિકલ્પઃ" ઇતિ । તત્ર પઞ્ચીકૃતમહાભૂતાભિમાની વિરાટ્ તદન્તર્યામી પરમાત્મા ઓતઃ સ્થૂલ ઉચ્યતે, સ એવાનિરુદ્ધઃ । એવમપઞ્ચીકૃતમહાભૂતાભિમાની જીવો હિરણ્યગર્ભઃ, તદન્તર્યામી અનુજ્ઞાતા પરમાત્મા સૂક્ષ્મ ઉચ્યતે; સ એવ પ્રદ્યુમ્નઃ । ગુણત્રયાવચ્છિન્નમાયોપાધિરવ્યાકૃતરૂપઃ સર્વબીજમ્ અનુજ્ઞોચ્યતે; સ એવ સઙ્કર્ષણઃ । અયમેવ પુરુષ ઈશ્વરશ્ચ પ્રાગુક્તઃ । એતસ્યૈવ ભેદા બ્રહ્મવિષ્ણુમહેશ્વરાઃ, ત્રિગુણાવચ્છિન્ન એકૈકગુણાવચ્છિન્નસ્યાન્તર્ભાવાત્ । અત એવ પૃથઙ્ નોક્તાઃ । સર્વોપાધિવિનિર્મુક્તસ્ત્વવિકલ્પો વાસુદેવઃ

પરમાત્મા મોક્ષાવલમ્બનમ્ । સ એવ સદાશિવો નિરાકારશ્ચ । એતેષાં ચતુર્ણાં જાગ્રત્સ્વપ્નસુષુપ્તતુરીયભેદેન ષોડશાવસ્થા ભવન્તિ ।

તથાહિ———ચક્ષુરાદિકરણવૃત્ત્યા સ્થૂલવિષયપરિજ્ઞાનં જાગ્રજ્જાગરણં, બાહ્યકરણવ્યાપારશૂન્યમનો વૃત્ત્યાવિદ્યાવૃત્ત્યા વા જાયમાનં સ્મરણવિભ્રમાદિ જાગ્રત્સ્વપ્નઃ, બાહ્યાન્તર્વિષયાનુભવસ્તબ્ધભાવમ્ અન્તરેણ કેવલસ્યૈવાવસ્થાનં સ્તબ્ધીભાવાપરપર્યાયં જાગ્રત્સુષુપ્તિઃ, બાહ્યાન્તર્વિષયાનુભવસ્તબ્ધીભાવવ્યતિરેકેણ પુણ્યપઞ્જપરિપાકાદજ્ઞસ્યાપિ સાક્ષિમાત્રાનુભવો ગુરૂપદેશાત્ ત્વમ્પદલક્ષ્યશુદ્ધસાક્ષિમાત્રાનુભવો વા જાગરણંતુરીયમિતિ ચતુર્વિધં જાગરણમ્ ।

તથા સ્વપ્નેઽપિ દેવતાદિપ્રસાદાદ્ યન્ત્રાદિપ્રાપ્તિઃ સ્વપ્નજાગરણં સ્વાપ્નૈરેવેન્દ્રિયૈઃ સ્વપ્ને રૂપાદ્યનુભવો વા, સ્વપ્નેઽપિ સ્વપ્નોઽયં મયા દૃષ્ટ ઇત્યનુભવઃ સ્વાપ્નમનસૈવ સ્મરણાદિકં વા સ્વપ્નસ્વપ્નઃ, સ્વપ્નેઽપિ સ્તબ્ધીભાવરૂપા પ્રબોધે વક્તુમશક્યા કાચિદ્ વૃત્તિઃ સ્વપ્નસુષુપ્તિઃ, એવં સ્વપ્નેઽપિ પુણ્યપુઞ્જપરિપાકાદ્વા તત્રત્યાચાર્યોપદેશાદ્ વા અહમેવ સર્વોઽસ્મીતિ વેદાર્થાનુભવઃ સ્વપ્નતુરીયમિતિ ચતુર્વિધઃ સ્વપ્નઃ ।

એવં સર્વબાહ્યાન્તઃકરણવૃત્તિશૂન્યા જ્ઞાનમાત્રશેષાપિ સુષુપ્ત્યવસ્થા જ્ઞાનસ્ય ગુણત્રયભેદાભ્યા(સાત્) સત્ત્વમાત્રવૃત્તિમતી ભવતિ સુખમ્ અહમ્ અસ્વાપ્સમિતિ પરામર્શજનિકા, સા સુષુપ્તિજાગરણમ્ । એવં રજોમાત્રવૃત્તિમતી દુઃખમ્ અહમ્ અસ્વાપ્સમિતિ પરામર્શહેતુઃ સા સુષુપ્તિસ્વપ્નઃ, તથા તમોમાત્રવૃત્તિમતી ગાઢમૂઢોઽહમ્ આસમિતિ પરામર્શકારણમ્ સા સુષુપ્તિસુષુપ્તિઃ, એતાદૃશસર્વવૃત્તિશૂન્યા તુ સાક્ષિચિન્માત્રરૂપા સા સુષુપ્તિતુરીયમિતિ ચતુર્વિધા સુષુપ્તિઃ । સર્વાવસ્થાત્રયં પરિત્યજ્ય તુરીયાવસ્થૈવાદેયા વાસુદેવપર્યવસાયિની ।

એતાસ્તિસ્રોઽવસ્થાઃ અજ્ઞવિજ્ઞસાધારણ્યઃ । તુરીયાવસ્થા તુ વિજ્ઞસ્યૈવ । સાપિ ચતુર્વિધા સર્વવ્યષ્ટીનાં સમષ્ટ્યનતિરેકાદાત્માનં સર્વસ્થૂલસમષ્ટિરૂપં વિરાજં બ્રહ્માણ્ડમયવિગ્રહં જ્ઞાત્વા સર્વસ્થૂલાભિમાનિજીવચૈતન્યસ્ય તદન્તર્યામ્યનિરુદ્ધચૈતન્યેનાભેદજ્ઞાનં તુરીયજાગરણમ્ । એવં સર્વસ્થૂલાનાં તત્કારણભૂતસૂક્ષ્માનતરેકાદપઞ્ચીકૃતમહાભૂતવિગ્રહં

હિરણ્યગર્ભમ્ આત્માનં જ્ઞાત્વા તદભિમાનિજીવચૈતન્યસ્ય
તદન્તર્યામિપ્રદ્યુમ્નચૈતન્યેનાભેદજ્ઞાનં તુરીયસ્વપ્નઃ ।
એવં સ્થૂલસૂક્ષ્મયોઃ કારણાનતિરેકાત્ સર્વકારણમ્ અવ્યાકૃતમ્
અજ્ઞાનમાત્રોપાધિમ્ આત્માનં જ્ઞાત્વા તત્પ્રતિબિમ્બિતજીવચૈતન્યસ્ય
બિમ્બભૂતાન્તર્યામિસઙ્કર્ષણચૈતન્યેનાભેદજ્ઞાનં તુરીયસુષુપ્તિઃ ।
જડસ્ય સર્વસ્ય કલ્પિતત્વેનાધિષ્ઠાનચૈતન્યાનતિરેકાત્ સર્વોપાધિશૂન્યં
ત્વમ્પદલક્ષ્યમ્ આત્માનં જ્ઞાત્વા અદ્વિતીયશુદ્ધચૈતન્યેન પૂર્ણેન
સહાભેદપરિજ્ઞાનાત્ તદ્રૂપેણૈવાવસ્થાં તુરીયતુરીયમ્ ।

એતા એવૌતાનુજ્ઞાત્રનુજ્ઞાવિકલ્પાખ્યાઃ સ્થૂલસૂક્ષ્મબીજસાક્ષિભૂતા
અકારોકારમકારોઙ્કારવાચ્યા અનિરુદ્ધપ્રદ્યુમ્નસઙ્કર્ષણવાસુદેવરૂપેણ
પર્યવસ્યન્તિ ચતસ્રોઽવસ્થાઃ । અત્ર પ્રત્યેકં મન્ત્રાસ્તન્ન્યાસાદયશ્ચ
ગુરૂપદેશાદવસેયાઃ કિમધિકેન ॥

ઇતિ શ્રીમધુસૂદનસરસ્વતીવિરચિતઃ ઈશ્વરપ્રતિપત્તિપ્રકાશઃ સમાપ્તઃ ।

Encoded and proofread by Sunder Hattangadi

---

*Ishvarapratipattiprakasha*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*